**अतिलोमश** पु० अतिरोमवत् । वनजाते छागे हृहद्वानरे च । अतिलोमयुक्ते त्रि० । नीलवृक्षायां स्त्री ।

**अतिवक्तृ** त्रि० अति+वच—तृच् ।वावदूके, वाचोयुक्तिदक्षे च ।

**अतिवक्र** पु० प्रा०स०"अतिवक्रा नगाष्टके" इति ज्योतिषोक्ते सूर्य्यस्य सप्तमाष्टमस्थितिवशात् पूर्व्वगतिविपरीतपश्चाद्गतिशालिनि भौमादिग्रहपञ्चके । अत्यन्तकुटिले त्रि० ।

**अतिवयस्** त्रि० अतिक्रान्तो वयः कालकृतावस्थां, वयसं पक्षिणं वा । प्राप्तवार्द्धके, अतिक्रान्तपक्षिणि च ।

**अतिवर्णाश्रमिन्** पु० अतिक्रान्तो वर्णानाश्रमिणश्च अत्या० स० । ब्राह्मणादिवर्णभिन्ने ब्रह्मचर्य्याद्याश्रमिभिन्ने च "यो वेदान्तमहावाक्यश्रवणेनैव केवलम् आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवे"दित्याद्युक्तलक्षणे एकात्मज्ञानिनि

**अतिवर्त्तन** न०अति+वृत-ल्युट् । अतिरेके। अतिक्रमप्र दण्ड वर्त्तने कर्त्तरि ल्यु । यानसारथ्यादेः, दण्डाभावप्रयोजके छिन्ननस्यादिदशके मनुना "यानस्य चैव यातुश्च यानस्वामिन एव च दशातिवर्त्तनान्याहुरित्युपक्रमग्र, छिन्ननस्ये भग्नयुगे तिर्य्यक्प्रतिमुखागते अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च । छेदने चैव यन्त्राणां यन्त्ररश्म्योस्तथैव च । आक्रोशे चाप्यपैहीति न दण्डं मनुरब्रीदिति" दण्डाभावकारणानि दश दर्शितानि ज्ञेयानि । अत्या०स०। अतीतजीवनोपाये त्रि० ।

**अतिवर्त्तिन्** त्रि० अतीत्य वर्त्तते अति+वृत—णिनि । अतिशयिनि, अग्रगे च । [

**अतिवर्त्तुल** पु० अतिशयितः वर्त्तुलः । (वाटुलाकलाइ) इति ख्याते वर्त्तुलाकारके कलाये । अत्यन्तवर्त्तुले त्रि० ।

**अतिवाद** पु० अति+वाद—घञ् । अत्युक्तौ, "अतिवादरता ये च" इति पुराणम् । "अतिवादं शंसत्यतिवादेन" इति वेदः । कठोरवाक्ये, अप्रियवाक्ये च ।

**अतिवादिन्** त्रि० सर्व्वानतीत्य वदतीति अति+वद—णिनि । सर्व्वानतिक्रम्य वदनशीले, सर्व्वमतखण्डनेन स्वमतव्यवस्थापके च । "विजानन् विद्वान् भवते नातिवादीति"श्रुतिः ।

**अतिवाह** पु०अतीत्य देहमन्यदेहे वाहः प्रापणम् ७त०। ऐहिकभोगसाधनादृष्टक्षये सूक्ष्मभूतमात्रासहितसूक्ष्मशरीरावच्छिन्नजीवस्य देहान्तरादिसंयोगाय नयने, अतियापने च । अतिवाहे नियुक्तः ठक् । आतिवाहिकः तत्रनियुक्ते त्रि० ।

**अतिवाहक** पु०अतीत्यैतं देहं वाहयति देहान्तरं प्रापयति अति+वह—ण्वुल् । ईश्वरनियोजिते अर्च्चिराद्यभिमानिदेवभेदे । तथाहि "अर्चिषोहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षण्मासान् उदङ्ङेति तान् मासान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसम् चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः सएनं ब्रह्म गमयतीति" श्रुतौ वाक्यशेषे अमानवपुरुषस्य ब्रह्मलोकप्रापकत्वश्रुतेः तत्पूर्व्वाणामपि अर्चिरादीनां चेतनत्वमिति "आतिवाहिकास्तल्लिङ्गादिति" सूत्रे निर्णीतम् । "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति" गीताव्याख्यायाञ्च अर्चिरादयस्तदभिमानिन्यो देवता" इति श्रीधरस्वामिभिरप्युक्तम् युक्तञ्च अदृष्टविकेन्द्रियादिकसूक्ष्मशरीरस्य स्थानान्तरनयनं चेतनकर्त्तृकं विनाऽनुपपन्नमित्यतस्तदानीं तस्य स्थानान्तरगमनसिद्धये कल्पितचेतनानामेव प्रेरकत्वमिति । अन्यच्च, "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन" मित्युक्तस्य भोगसाधनस्य निश्चेष्टस्य सूक्ष्मशरीरस्य तदवच्छिन्नजीवस्य च स्थानान्तरनयनमाश्रयभूतेन विना न सम्भवतीति तदाश्रयभूतं भूतपञ्चकं च कल्प्यते यथोक्तं मनुना "अण्व्यो मात्राविनाशिन्यो दशार्द्धानान्तु याः स्मृताः । ताभिः सार्द्धम्"इत्युक्तम् शारीरकसूत्रे च "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः इति" भूतमात्रोपष्टब्धस्यैव संसरणमुक्तं सांख्ये च "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गमिति, संसरति निरुपभोगं भावैरतिवासितं लिङ्गमिति" चोक्तम् । अतिवाहप्रकारस्तु उत्क्रमणशब्दे विशेषेण वक्ष्यते । अति+वह—णिच् ण्वुल् अतिवाहकारके, अतियापके च त्रि० ।

**अतिवाहिक** त्रि० अतिवाहः अस्त्यस्य ठन् । अतिवाहयोग्ये अतिवाहशब्दोक्ते सूक्ष्मशरीरे । [क्रमिते च ।

**अतिवाहित** त्रि० अति+वह—णिच्—क्त । यापिते, अति-

**अतिवाह्य** त्रि० अति+वह—णिच् कर्म्मणि-यत् । अतिवाहयोग्ये कालादौ । [अतिकराले त्रि० ।

**अतिविकट** पु० अतिशयेन विकटः । दुष्टहस्तिनि ।

**अतिविषा** स्त्री अतिक्रान्ता विषम् अत्या०स० । (आतइच) इति ख्यातायाम् लतायाम् ।

"त्रिविधाऽतिविषा ज्ञेया शुक्ला कृष्णा तथाऽरुणा। रसवीर्य्यविपाकेषु निर्विशेष गुणाधिकेति" वैद्यकम् । विषातिक्रमकारके त्रि० । [क्रान्ते "तद्युद्धमतिवृत्तमिति" नाट० ।

**अतिवृत्त** त्रि० अतिक्रम्य वर्त्तते वृत-क्त । अतिशयिते, अति-